CC-O. In Public Domain. Digitized by eGangotri

॥ श्रीः ॥

संस्कृतभाषादीपिका

द्वितीया

श्रीसुरसरस्वतीसभा

शृङ्गगिरिः

१९९२

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

॥ श्रीः ॥

संस्कृतभाषाबोधिनी

द्वितीया

श्रीसुरसरस्वतीसभा

शृङ्गगिरिः

१९९२

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ಮೂರನೆಯ ಮುದ್ರಣ : 1992

ಪ್ರತಿಗಳು : 5000

ಎಲ್ಲಾ ಹಕ್ಕುಗಳು ಕಾದಿರಿಸಲ್ಪಟ್ಟಿವೆ.

ಬೆಲೆ : ರೂ. 4-00

ಈ ಪುಸ್ತಕವು ದೊರೆಯುವ ಸ್ಥಳ :

ಶ್ರೀಸುರಸರಸ್ವತೀಸಭಾ

ಶ್ರೀ ಶಂಕರಮಠದ ಆವರಣ

ಶಂಕರಮಠ ರಸ್ತೆ

ಶಂಕರಪುರಂ, ಬೆಂಗಳೂರು - 560 004

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ಮುನ್ನುಡಿ

ನಮ್ಮ ದೇಶಭಾಷೆಗಳಿಗೆಲ್ಲ ಮೂಲವೂ ಆದ್ದರಿಂದಲೇ ಶ್ರೇಷ್ಠವೂ ಆದ ಸಂಸ್ಕೃತಭಾಷೆಯನ್ನು ಎಲ್ಲರೂ ಕಲಿಯಲೆಂಬುದು ಶ್ರೀ ಶ್ರೀ ಶೃಂಗೇರಿ ಜಗದ್ಗುರು ಮಹಾಸನ್ನಿಧಾನಂಗಳವರ ಆಶಯವಾಗಿದೆ. ಈ ಉದ್ದೇಶದಿಂದ ಅವರು "ಶ್ರೀಸುರಸರಸ್ವತೀಸಭಾ" ಎಂಬ ಸಂಸ್ಥೆಯನ್ನು ಸ್ಥಾಪಿಸಿ ಪೋಷಿಸುತ್ತಿದ್ದಾರೆ. ಈ ಸಭೆಯು ಸಂಸ್ಕೃತಭಾಷೆಯ ಪ್ರಚಾರಕ್ಕಾಗಿ ತನ್ನದೇ ಆದ ಪರೀಕ್ಷೆಗಳನ್ನು ಏರ್ಪಡಿಸಿ ನಡೆಸುತ್ತ ಬಂದಿದೆ. ಈ ಪರೀಕ್ಷೆಗಳು ತುಂಬ ಜನಪ್ರಿಯವಾಗುತ್ತಿರುವುದನ್ನು ಗಮನಿಸಿ ಇವುಗಳ ಪ್ರಗತಿಗಾಗಿ ಶ್ರೀ ಮಹಾಸನ್ನಿಧಾನಂಗಳವರು ಕೆಳಗೆ ಕಂಡ ವಿದ್ವಾಂಸರನ್ನೊಳಗೊಂಡ ಒಂದು ಪಠ್ಯಪುಸ್ತಕ ಸಮಿತಿಯನ್ನು ನೇಮಿಸಿದರು.

1. ವಿದ್ವಾನ್ ಎನ್. ರಂಗನಾಥಶರ್ಮ (ಅಧ್ಯಕ್ಷರು)
2. ವಿದ್ವಾನ್ ಎಸ್. ವಿ. ಶಾಮಭಟ್ಟರು
3. ವಿದ್ವಾನ್ ಬಿ ಎಸ್. ಕೃಷ್ಣಪ್ಪನವರು
4. ವಿದ್ವಾನ್ ಎಸ್. ಎ. ರಾಮಚಂದ್ರಭಟ್ಟರು

ಈ ಸಮಿತಿಯವರು ಶ್ರಮವಹಿಸಿ ಉತ್ಸಾಹದಿಂದ ಈ ಪುಸ್ತಕವನ್ನು ರಚಿಸಿಕೊಟ್ಟಿದ್ದಾರೆ. ಇವರಿಗೂ, ಇದನ್ನು ಅಂದವಾಗಿ ಮುದ್ರಿಸಿಕೊಟ್ಟಿರುವ ಶ್ರೀ ಡಿ. ಎಸ್. ಕೃಷ್ಣಾಚಾರ್ಯರು, ಪ್ರಭಾ ಮುದ್ರಣಾಲಯ, ಬೆಂಗಳೂರು-4 ಅವರಿಗೂ ಧನ್ಯವಾದಗಳನ್ನರ್ಪಿಸುತ್ತೇನೆ.

ಬೆಂಗಳೂರು
ಶ್ರೀ ಪ್ರಜೋತ್ಪತ್ತಿ ನಾಮ ಸಂವತ್ಸರ
ಮಾಘ ಶುದ್ಧ ತದಿಗೆ
6-2-1992

ಎಸ್. ಜಿ. ಸುಂದರಸ್ವಾಮಿ
ಅಧ್ಯಕ್ಷ
ಶ್ರೀಸುರಸರಸ್ವತೀ ಸಭಾ

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ವಿಷಯಾನುಕ್ರಮಣಿಕೆ

पाठः		पुटम्
१.	श्रीहरिः	5
२.	दिवाकरः	9
३.	इन्दुः	11
४.	सम्भाषणम्	13
५.	गौः	16
६.	मारुतेः वाक्कौशलम्	19
७.	श्रीकृष्णस्य उपदेशः	22
८.	पार्वती परमेश्वरं वक्रभणित्या पराजयते	26
९.	सङ्घजीवी मानवः	28
१०.	नन्दिनीवरप्रदानम्	31
११.	छान्दसानां कविता	35
१२.	सुभाषितानि	38
	लोकोक्तयः	40
	क्रियारूपाणि	41
	शब्दरूपाणि	47

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

प्रथमः पाठः

श्रीहरिः

हरिः लोकं रक्षति। हरिं विना अन्यः रक्षकः नास्ति। भक्ताः हरिं भक्त्या पूजयन्ति। ते हरये कुसुमाञ्जलिं अर्पयन्ति। हरिणा लोकः संरक्ष्यते। अहं हरेः मन्दिरं गच्छामि। हरौ रुष्टे गुरुः त्रायते। अहं हरेः चरणयोः प्रणमामि। हे हरे! मां रक्ष रक्ष।

अतिथिं देवं भावय। यूयं अतिथीनां सपर्यां कुरुत। कवेः ऋषेः च कार्ये विभिन्ने। कवीनां हृदयं उदधिः इव गम्भीरम्। अयं स्वप्रतिभया यथा रोचते तथा विश्वं परिवर्तयति। अतः कविः एकः प्रजापतिः। भवभूति-भास-भारवि-कालिदासादयः महाकवयः इति विश्रुताः। तेषु कालिदासः कविकुलगुरुः।

ऋषयः यतयः च आश्रमेषु वसन्ति। ते उग्रं तपः आचरन्ति। ऋषिषु वाल्मीकिः व्यासः च भारतमातुः सुपुत्रौ। वाल्मीकिना श्रीमद्रामायणं विरचितम्। इदमेव आदिकाव्यमिति विख्यातम्। वाल्मीकिः आदिकविः इति विश्रुतः।

भगवान् व्यासः महाभारतस्य निर्माता। अष्टादशपुराणानां ब्रह्मसूत्राणां च कर्ता अयमेव। रामायणं महाभारतं अष्टादश

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

पुराणानि च भारतीयसंस्कृतेः आकराः ग्रन्थाः। नमो वाल्मीकये व्यासाय च।

अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः।
अफाललोचनः शम्भुः भगवान् बादरायणः॥

अभ्यासः

I संस्कृतभाषया उत्तरं लिखत :—

के हरिं पूजयन्ति? केन लोकः संरक्ष्यते? त्वं कस्य मन्दिरं गच्छसि? केषां हृदयं उदधिः इव गम्भीरम्? विश्रुताः महाकवयः के? भारतस्य सुपुत्रौ कौ? श्रीमद्रामायणं केन विरचितम्? महाभारतस्य निर्माता कः? भारतीयसंस्कृतेः आकराः ग्रन्थाः के?

II अधोलिखितानां पदानां अन्तं लिङ्गं वचनं विभक्तिं च लिखत :—

नेत्रे, भक्त्या, चरणयोः हरौ, वाल्मीकिना, आश्रमेषु, स्वप्रतिभया, पुराणानि

III इमानि वाक्यानि पूरयत :—

(१) ——लोकः संरक्ष्यते।
(२) ——शम्भुं पूजयन्ति।
(३) ——मन्दिरं कुत्र? ——वाल्मीकये!
(४) ते ——तपः आचरन्ति।

Sri Vidyabharati Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

IV एषां शब्दानां निर्दिष्टविभक्तिरूपाणि लिखत :—

यति—तृतीया। मुनि—पञ्चमी।

रविः—चतुर्थी। गिरि—षष्ठी।

ಶಬ್ದಾರ್ಥ

ರುಷ್ಟೆ=ಕೋಪಗೊಳ್ಳಲಾಗಿ, भावय=ತಿಳಿ, सपर्या=ಪೂಜೆ, उदधिः इव=ಸಮುದ್ರದಂತೆ, रोचते=ಇಷ್ಟವಾಗುತ್ತದೆ, प्रजापतिः=ಬ್ರಹ್ಮ, उग्रम्=ಕಠಿಣವಾದ, विश्रुतः=ಪ್ರಸಿದ್ಧ, अफाललोचनः=ಹಣೆಯಲ್ಲಿ ಕಣ್ಣಿಲ್ಲದ, अचतुर्वदनः=ನಾಲ್ಕು ಮುಖಗಳಿಲ್ಲದ, बादरायणः=ವ್ಯಾಸರು, गम्भीरम्=ಆಳ, ತಿಳಿಯಲಶಕ್ಯ.

व्याकरण भाग

1 यण्सन्धिः

ನಿಯಮ :—इ ई उ ऊ ऋ ॠ ಗಳಿಗೆ ಅಸವರ್ಣ ಸ್ವರವು ಪರವಾದರೆ इ ई ಕಾರಗಳ ಸ್ಥಾನದಲ್ಲಿ य ಕಾರವೂ, उ ऊ ಕಾರಗಳ ಸ್ಥಾನದಲ್ಲಿ व ಕಾರವೂ, ऋ ॠ ಕಾರಗಳ ಸ್ಥಾನದಲ್ಲಿ र ಕಾರವೂ (ರೇಫವು) ಆದೇಶವಾಗಿ ಬರುತ್ತದೆ.

ಉದಾ :— इति+अत्र=इत्यत्र।

मनु+अन्तरम्=मन्वन्तरम्।

पितृ+आज्ञा=पित्राज्ञा।

2 यान्तवान्तादेशसन्धिः

ನಿಯಮ :—ए ऐ, ओ औ ಕಾರಗಳಿಗೆ ಸ್ವರವು ಪರವಾದರೆ ಕ್ರಮವಾಗಿ अय्, आय्, अव्, आव् ಗಳು ಆದೇಶವಾಗಿ ಬರುತ್ತವೆ.

ಉದಾ :—हरे+ए=हरये नैः+अकः=नायकः

गुरो+ए=गुरवे पौ+अकः=पावकः

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

3 पूर्वरूपसन्धिः

ನಿಯಮ :—ಪದದ ಕೊನೆಯಲ್ಲಿರುವ ए ಅಥವಾ ओ ಕಾರದ ಮುಂದೆ अ ಕಾರವು ಬಂದರೆ ಆ अ ಕಾರವು ಅದರ ಹಿಂದಿನ ए ಅಥವಾ ओ ಕಾರದೊಡನೆ ಸೇರಿಕೊಳ್ಳುವುದು.

ಉದಾ :—अन्ते+अपि = अन्तेऽपि
हरे+अव = हरेऽव
सो+अयम् = सोऽयम्
रामो+अवदत् = रामोऽवदत्

अभ्यासः

I सन्धिं कुरुत :—

यदि+अपि, साधु+इदम्, मातृ+आदेशः, तौ+उभौ, हरौ+इव, शम्भो+ए, यते+ए, ननु+अहम्, नृपो+अपि, रामो+अपि, को+अपि, विप्रो+अपठत्

II सन्धिं विगृह्य वदत :—

नन्विदम्, मुन्याश्रमः, पित्रार्जितम्, विष्णवे, द्वावपि, असावेव, स्थाण्वाश्रमः, मात्रनुमतिः एतेऽपि, केऽत्र, नरोऽयम्, गजोऽयम्, मृगोऽयम्

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

द्वितीयः पाठः

दिवाकरः

दिवाकरः प्रभाते उदेति। प्राच्यां अस्य बिम्बं आरक्तं भवति। तदानीं तस्य प्रकाशः कोमलः भवति। सः उषःकालः। उषःकाले गृहात् बहिः नद्याः तीरे सन्ध्यां उपासते वैदिकाः। तस्मिन् समये पर्यटनं आरोग्यं जनयति। तदा अन्धकारः नश्यति। सर्वत्र प्रकाशः प्रसरति। सर्वे जन्तवः उत्तिष्ठन्ति। लतासु पादपेषु च कुसुमानि विकसन्ति। पुष्पाणां सौरभं वायुः सर्वत्र सर्वासु दिशासु प्रसारयति। उदयमानं रविं आस्तिकाः भक्त्या प्रणमन्ति।

क्रमेण रविः अम्बरमध्यं आरोहति। तदा तस्य मरीचयः प्रखराः भवन्ति। क्रमेण सः प्रतीच्यां अवतरति। पुनः तस्य बिम्बं आरक्तं भवति। तदा मयूखाः कोमलाः भवन्ति। तदानीं सर्वे जन्तवः स्वस्वनिवासं प्रतिनिवर्तन्ते, रात्रौ विश्रान्तिसुखं अनुभवन्ति च।

उदये सविता रक्तः रक्तश्चास्तमये तथा।
सम्पत्तौ च विपत्तौ च महतामेकरूपता॥

अभ्यासः

I संस्कृतभाषया उत्तरं लिखत :—

भानुः कदा उदेति? वैदिकाः कां उपसते? उषःकाले

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

पर्यटनं किं जनयति ? वायुः कं प्रसारयति ? रवेः मरीचयः कदा प्रखराः भवन्ति ? सूर्यस्य बिम्बं कदा आरक्तं भवति ? जन्तवः रात्रौ किं अनुभवन्ति ? सविता कदा रक्तः भवति ?

II रूपाणि निर्दिशत :—

गृहात्, सन्ध्यां, जन्तवः, लतासु, मरीचयः, सर्वे, सम्पत्तौ, सविता

III पर्यायशब्दान् वदत :—

भानुः, गृहम्, जलम्, पादपः, वायुः, मरीचिः

IV वाक्ये योजयत :—

बहिः, दिशासु, सर्वत्र, अवतरति, कुसुमानि

ಶಬ್ದಾರ್ಥ

उषःकालः = ಮುಂಜಾನೆ, बहिः = ಹೊರಗಡೆ, आरक्तं = ನಸುಗೆಂಪು, मरीचिः, मयूखः = ಕಿರಣ.

ವಿಶೇಷ ಕ್ರಿಯಾಪದ

लट् = परस्मैपदम्

उत्+एति =	उदेति	उदितः	उद्यन्ति
	उदेषि	उदिथः	उदिथ
	उदेमि	उदिवः	उदिमः

लट् = आत्मनेपदम्

उप+आस्ते =	उपास्ते	उपासाते	उपासते
	उपास्से	उपासाथे	उपाध्वे
	उपासे	उपास्वहे	उपास्महे

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

तृतीयः पाठः

इन्दुः

इन्दुः रात्रौ उदयते । इन्दोः प्रकाशः चन्द्रिका । चन्द्रिकायाः ज्योत्स्ना कौमुदीति अपरे नाम्नी । सा शीतला आह्लादकरी च वर्तते ।

सूर्यस्य प्रकाशः स्वकीयः । अत एव सः चण्डरश्मिः । विधोः प्रकाशः परकीयः । अयं रवेः लभते प्रकाशम् । अतः शीतलः । चन्द्रः भूमिं परितः प्रदक्षिणं करोति । एकेन मासेन तत्पूर्णं भवति । पूर्णिमायां चन्द्रस्य बिम्बं पूर्णं भवति । ततः दिने दिने क्षीयते विधुः । तदा कृष्णपक्षः भवति ।

चन्द्रस्य षोडशकलाः सन्ति । तस्य कालमेकां धूर्जटिः शीर्षे वहति । अतः सः चन्द्रशेखरः इति प्रथितः । अमावास्यायां चन्द्रस्य न कापि कला दृश्यते गगने । पुनः प्रतिपदमारभ्य क्रमेण सः वर्धते । तदा शुक्लपक्षः भवति ।

रात्रेः अमूल्यं आभरणं विधुः । विधोः अमूल्यं आभरणं रात्रिः ।

"त्रियामा शशिना भाति शशी भाति त्रियामया" ।

सूर्यः चन्द्रः च परमेश्वरस्य द्वे नेत्रे । सः एताभ्यां नेत्राभ्यां जनानां व्यवहारं पश्यति । ये साधु कर्म कुर्वन्ति ते तस्य प्रियाः भवन्ति । तस्य अनुग्रहेण सुखं अनुभवन्ति । ये दुष्टं कर्म कुर्वन्ति ते तस्य कोपस्य पात्राणि भवन्ति । दुःखं अनुभवन्ति च ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अभ्यासः

I संस्कृतभाषया उत्तरं लिखत :—

इन्दुः कदा उदयते ? कस्य प्रकाशः स्वकीयः ? कस्य प्रकाशः परकीयः ? भूमिं परितः कः प्रदक्षिणं करोति ? चन्द्रस्य बिम्बं कदा पूर्णं भवति ? चन्द्रस्य कति कलाः सन्ति ? धूर्जटिः शीर्षे कां वहति ? चन्द्रस्य कला कदा न दृश्यते ?

II एषां पदानां अन्तं लिङ्गं विभक्तिं वचनं च लिखत :—

रात्रौ, अपरे, विधोः, पूर्णिमायाम्, गगने, नेत्रे

III पर्यायशब्दान् वदत :—

इन्दुः, रात्रिः, चन्द्रिका, भूमिः, शीर्षम्, नेत्रम्

IV इतरवचनद्वयं लिखत :—

इन्दोः, शीर्षे, पूर्णिमायाम्, सूर्यस्य, शीतला, कलाम्

ಶಬ್ದಾರ್ಥ

धूर्जटिः = ಪರಮೇಶ್ವರ, प्रथितः = ಪ್ರಸಿದ್ಧ, त्रियामा = ರಾತ್ರಿ, प्रतिपत् = ಪಾಡ್ಯ, स्वकीयः = ತನ್ನದು, रश्मिः = ಕಿರಣ, विधुः = ಚಂದ್ರ, परितः = ಸುತ್ತಲೂ.

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

चतुर्थः पाठः

सम्भाषणम्

एकदा कश्चन अध्यापकः शिष्येण साकं समुद्रतीरं गतः। तत्रैकस्मिन् शिलातले उभावुपविष्टौ। प्रभूतं जलराशिं सैकतराशिं च विलोक्य शिष्यः विस्मयते। तदा गुरुः तं पृच्छति।

अध्यापकः—अये वत्स गोविन्द, समुद्रस्य सलिलं कथमस्ति ?

गोविन्दः—आचार्य, अत्यन्तं क्षुभितमस्ति।

अ.—वत्स, किञ्चित् जलं पिब।

[सः पीत्वा गुरुं वदति।]

गो.—गुरो, अर्णवस्य जलं अत्यन्तं क्षारमस्ति। कुतः ?

अ.—गोविन्द, भूमौ रौप्यं, सुवर्णं, लोहं, ताम्रं, सैन्धवं इत्यादयः अनेके धातवः विद्यन्ते। तेषु सैन्धवं नद्यः समुद्रं प्रापयन्ति।

गो.—आचार्य, सैन्धवं नाम किम् ?

अ.—वत्स, सैन्धवं नाम लवणविशेषः। तल्लवणं सागरस्य जले द्रवति। तस्मात् समुद्रस्य जलं अत्यन्तं क्षारमस्ति।

गो.—समुद्रे के के जन्तवः निवसन्ति ?

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अ.—तत्र क्षुद्राः मीनाः, महामीनाः, मकराः, कूर्माः, तिमिङ्गिलाश्च निवसन्ति। तिमिङ्गिलाः पर्वताकाराः वर्तन्ते। तेषां शक्तिः महती। ते लघून् मत्स्यान् भक्षयन्ति। महानावमपि उत्पातयन्ति ते।

गो.—तर्हि समुद्रः अतीव भीषणः इति मन्ये।

अ—अये गोविन्द, अयं यथा भीषणः तथा सुरम्यः च वर्तते। यतः अत्र पश्य तावत्, सैकतराशौ एताः शुक्तिकाः, इमे शङ्खाः। आसु शुक्तिकासु अमूल्यानि मौक्तिकानि जायन्ते। समुद्रेषु प्रवालादि नानाविधानि रत्नानि लभ्यन्ते। अत एवायं रत्नाकरः इति प्रख्यातः अस्य उदधिः अब्धिः सागरः इति नामान्तराणि वर्तन्ते।

इमं श्लोकं आकर्णय—

रत्नाकरः किं कुरुते स्वरत्नैः
विन्ध्याचलः किं करिभिः करोति।
श्रीखण्डखण्डैः मलयाचलः किं
परोपकाराय सतां विभूतयः॥

अभ्यासः

I संस्कृतभाषया उत्तरं लिखत :—

अध्यापकः शिष्येण साकं कुत्र गतः? तौ कुत्र उपविष्टौ?
शिष्यः कुतः विस्मयते? समुद्रस्य जलं कथं अस्ति?

Sri Vidyabharathi Educational Centre, Singeri

CC-O. In Public Domain. Digitized by eGangotri

भूमौ विद्यमानाः धातवः के? समुद्रे के के निवसन्ति? तिमिङ्गिलस्य स्वभावः कः? सैकतराशौ कानि विद्यन्ते? समुद्रस्य रत्नाकरः इति नाम कथं युज्यते?

II "परोपकाराय सतां विभूतयः" इत्युक्तिं मातृभाषया विवृणुत।

III इमानि वाक्यानि प्रश्नवाक्यानि कुरुत :—

समुद्रे जलचराः निवसन्ति। गगने पतगाः डयन्ते। सुवर्णम् अमूल्यो धातुः। तिमिङ्गिलाः पर्वताकाराः वर्तन्ते।

IV एतानि वाक्येषु योजयत :—

कदा, कथम्, कुत्र, कुतः, कीदृशः, कति

ಶಬ್ದಾರ್ಥ

सैकतम्=ಮರಳು, क्षारम्, सैन्धवम् = ಉಪ್ಪು, रौप्यम् = ಬೆಳ್ಳಿ, द्रवति = ಕರಗುತ್ತದೆ, क्षुद्रः = ಚಿಕ್ಕದು, मकरः = ಮೊಸಳೆ, महानावम् = ದೊಡ್ಡ ಹಡಗನ್ನು, शुक्तिका = ಮುತ್ತಿನ ಚಿಪ್ಪು, मौक्तिकानि = ಮುತ್ತುಗಳು, प्रवालः = ಹವಳ, विभूतयः=ಸಂಪತ್ತುಗಳು, धातुः=ಖನಿಜ.

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

पञ्चमः पाठः

गौः

एषा गौः। गोः धेनुः इति नामान्तरं विद्यते। अस्याः चत्वारः पादाः सन्ति। द्वे शृङ्गे वर्तेते। एकं लम्बं पुच्छं च विद्यते। इयं प्रकृत्या आकारेण च परमा साध्वी। अस्याः वत्सः समीपे तिष्ठति। प्रत्यहं गोपालः द्विवारं गां क्षीरं दोग्धि। प्रातः सायं च द्वौ गोदोहनकालौ भवतः। गोपः वामेन करेण पात्रं धृत्वा दक्षिणेन हस्तेन दुग्धं दोग्धि। प्रथमं वत्सः स्तन्यं पिबति पश्चात् पयः गां दोग्धि गोपालः। गोदोहनानन्तरं सः वत्सः पुनः पयः पिबति।

गावः प्रीत्या हरितानि तृणानि, पिण्याकं, कार्पास-बीजानि, बुसं च खादन्ति। ताः मधुरं क्षीरं वितरन्ति च। धेनूनां क्षीरं सर्वेषां पथ्यं भवति। क्षीरेण दधि, तक्रं, नवनीतं, घृतं च भवति। घृतेन वर्धते बुद्धिः। गोमयं, गोमूत्रं, घृतं, दधि, क्षीरं च पञ्चगव्यमिति प्रख्यातम्। 'एतत्प्राशनं सकल-पापनिवारकम्' इति मन्यन्ते। गौः अस्माभिः मातेव पूजनीया, देवतेव दर्शनीया, दीनेव दयनीया, निधिः इव रक्षणीया चास्ति॥

भुक्त्वा तृणानि शुष्कानि पीत्वा तोयं जलाशयात्।
दुग्धं ददति लोकेभ्यः गावो लोकस्य मातरः॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अभ्यासः

I संस्कृतभाषया उत्तरं लिखत :—

गोः कति पादाः सन्ति ? वत्सः कुत्रास्ति ? गोदोहनकालौ कौ ? गोपालः कथं दुग्धं दोग्धि ? गावः किं किं खादन्ति ? धेनूनां क्षीरं कथं भवति ? क्षीरेण किं किं भवति ?

II इतरवचनद्वयं लिखत :—

शृङ्गे, पादाः, गोः, हस्तेन, धेनूनाम्, सर्वेषाम्।

शब्दार्थ

चत्वारः=ನಾಲ್ಕು, शृङ्गम्=ಕೊಂಬು, पुच्छम्=ಬಾಲ, प्रकृत्या=ಸ್ವಭಾವದಿಂದ, वत्सः=ಕರು, दोहनं=ಹಾಲು ಕರೆಯುವುದು, पश्चात्=ಅನಂತರ, स्तन्यम्=ಹಾಲು, हरितानि=ಹಸುರಾದ, पिण्याकम्=ಹಿಂಡಿ, बुसम्=ಹೊಟ್ಟು, कार्पासबीजानि=ಹತ್ತಿ ಬೀಜ, पथ्यम्=ಹಿತಕರ, घृतम्=ತುಪ್ಪ, दधि=ಮೊಸರು, तक्रम्=ಮಜ್ಜಿಗೆ, नवनीतम्=ಬೆಣ್ಣೆ, प्राशनम्=ಕುಡಿಯುವುದು, शुष्कानि=ಒಣಗಿದ, तोयम्=ನೀರು.

भूतकृदन्तावयव

धातುವಿಗೆ त्वा (क्त्वा) ಎಂಬ ಪ್ರತ್ಯಯವನ್ನು ಸೇರಿಸಿದರೆ ಭೂತಕಾಲಿಕ ಕೃದಂತಾವ್ಯಯವಾಗುತ್ತದೆ.

ಉದಾ :—धृ+त्वा=धृत्वा, पा+त्वा=पीत्वा,
भुज्+त्वा=भुक्त्वा, रक्ष्+त्वा=रक्षित्वा

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ಧಾತುವಿಗೆ ಉಪಸರ್ಗವು ಸೇರಿದ್ದರೆ ತ್ವಾ ಕ್ಕೆ ಬದಲಾಗಿ ಯ (ಲ್ಯಪ್) ಎಂಬ ಪ್ರತ್ಯಯವು ಆದೇಶವಾಗಿ ಬರುತ್ತದೆ.

दा+त्वा=दत्वा	आ+दा+य=आदाय
गम्+त्वा=गत्वा	आ+गम्+य=आगम्य, आगत्य
जि+त्वा=जित्वा	वि+जि+य=विजित्य

ಧಾತುವಿಗೆ ಪ್ರತ್ಯಯಗಳನ್ನು ಸೇರಿಸಿದಾಗ ಮೇಲೆ ಕಾಣಿಸಿದಂತೆ ಕೆಲವು ವ್ಯತ್ಯಾಸಗಳಾಗುತ್ತವೆ.

ಉಪಸರ್ಗ

ಧಾತುವಿಗೆ ಮೊದಲು ಸೇರಿಸುವ **प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आ, नि, अधि, अपि, अति, सु, उत्, अभि प्रति, परि, उप**—ಇವುಗಳಿಗೆ ಉಪಸರ್ಗಗಳೆಂದು ಹೆಸರು. ಇವುಗಳಿಗೆ ಸ್ವತಂತ್ರವಾದ ಅರ್ಥವಿಲ್ಲ. ಆದರೆ ಇವುಗಳನ್ನು ಸೇರಿಸುವುದರಿಂದ ಧಾತುವಿನ ಅರ್ಥವು ವ್ಯತಾಸವಾಗುವುದು.

ಉದಾ :—**गच्छति**=ಹೋಗುತ್ತಾನೆ.

आ+गच्छति=**आगच्छति** ಬರುತ್ತಾನೆ.
अनु+गच्छति=**अनुगच्छति** ಹಿಂಬಾಲಿಸುತ್ತಾನೆ.
अधि+गच्छति=**अधिगच्छति** ಪಡೆಯುತ್ತಾನೆ.

ವಿಶೇಷ ಕ್ರಿಯಾಪದ

लट्=ಪರಸ್ಮೈಪದ

ददाति	दत्तः	ददति	दोग्धि	दुग्धः	दुहन्ति
ददासि	दत्थः	दत्थ	धोक्षि	दुग्धः	दुग्ध
ददामि	दद्वः	दद्मः	दोह्मि	दुह्वः	दुह्मः

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ಷಷ್ಠಃ ಪಾಠಃ

मारुतेः वाक्कौशलम्

ಈ ಭಾಗವನ್ನು ಶ್ರೀಮದ್ರಾಮಾಯಣದ ಕಿಷ್ಕಿಂಧಾಕಾಂಡದ ಮೂರನೇ ಸರ್ಗದಿಂದ ಆರಿಸಲಾಗಿದೆ.

ಸುಗ್ರೀವನ ಸೂಚನೆಯಂತೆ ಹನುಮಂತನು ಭಿಕ್ಷುರೂಪದಿಂದ ಬಂದು ರಾಮಲಕ್ಷ್ಮಣರನ್ನು ಭೇಟಿಮಾಡುವನು. ಆ ಸಮಯದಲ್ಲಿ ಅವನು ಆಡಿದ ಸುಸಂಸ್ಕೃತವೂ ನಿರ್ದುಷ್ಟವೂ ಆದ ಮಾತುಗಳನ್ನು ಕೇಳಿದ ಶ್ರೀರಾಮನು ಮಾರುತಿಯನ್ನು ಮನಸಾರೆ ಕೊಂಡಾಡುವನು.

सुग्रीवो नाम धर्मात्मा कश्चिद्वानरपुङ्गवः ।
वीरो विनिकृतो भ्रात्रा जगद्भ्रमति दुःखितः ॥ १ ॥

प्राप्तोऽहं प्रेषितस्तेन सुग्रीवेण महात्मना ।
राज्ञा वानरमुख्यानां हनूमान् नाम वानरः ॥ २ ॥

युवाभ्यां स हि धर्मात्मा सुग्रीवः सख्यमिच्छति ।
तस्य मां सचिवं वित्तं वानरं पवनात्मजम् ॥ ३ ॥

एतच्छ्रुत्वा वचस्तस्य रामो लक्ष्मणमब्रवीत् ।
सचीवोऽयं कपीन्द्रस्य सुग्रीवस्य महात्मनः ॥ ४ ॥

तमेवं काङ्क्षमाणस्य ममान्तिकमिहागतः ।
अभिभाषस्व सौमित्रे सुग्रीवसचिवं कपिम् ॥ ५ ॥

नानृग्वेदविनीतस्य नायजुर्वेदधारिणः ।
नासामवेदविदुषः शक्यमेवं प्रभाषितुम् ॥ ६ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

नूनं व्याकरणं कृत्स्नं अनेन बहुधा श्रुतम् ।
बहु व्याहरतानेन न किञ्चिदपशब्दितम् ॥ ७ ॥

न मुखे नेत्रयोश्चापि ललाटे च भ्रुवोस्तथा ।
अन्येष्वपि च गात्रेषु दोषः संविदितः क्वचित् ॥ ८ ॥

संस्कारक्रमसंपन्नां अद्भुतामविलम्बिताम् ।
उच्चारयति कल्याणीं वाचं हृदयहारिणीम् ॥ ९ ॥

अनया चित्रया वाचा त्रिस्थानव्यञ्जनस्थया ।
कस्य नाराध्यते चित्तं उद्यतासेररेरपि ॥ १० ॥

एवं गुणगणैर्युक्ताः यस्य स्युः कार्यसाधकाः ।
तस्य सिद्ध्यन्ति सर्वेऽर्थाः दूतवाक्यप्रचोदिताः ॥ ११ ॥

अभ्यास

I संस्कृतभाषया उत्तरं लिखत :—

अयं भागः कस्मात् ग्रन्थात् उद्धृतः ? सुग्रीवसचिवः कः ? रामः कं काङ्क्षमाणः आसीत् ? सुग्रीवः काभ्यां सह सख्यमिच्छति ? सुग्रीवस्य भ्राता कः ? त्रिस्थानानि कानि ?

II मातृभाषया उत्तरं लिखत :—

1. मारुतेः वचनवैखरीं वर्णयत ।
2. मारुतिः आत्मानं कथं परिचाययति ?
3. दूतस्य लक्षणं किम् ? विशदयत ।
4. कीदृशं वचनं प्रियं मनोहारि च ?

Sri Vidyabharati Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ಶಬ್ದಾರ್ಥ

ಪುಷ್ಕರಃ=ಶ್ರೇಷ್ಠ, **ವಿನಿಕೃತಃ**=ತ್ಯಜಿಸಲ್ಪಟ್ಟವನಾಗಿ, **ವಿತ್ತಮ್**=ತಿಳಿಯಿರಿ (ಕ್ರಿಯಾಪದ), **ಏತತ್+ಶ್ರುತ್ವಾ**=ಇದನ್ನು ಕೇಳಿ, **ಕಾಙ್ಕ್ಷಮಾಣಸ್ಯ**=ಬಯಸುತ್ತಿರುವ, **ಅನ್ತಿಕಮ್**=ಸಮೀಪ, **ಅಭಿಭಾಷಸ್ವ**=ಮಾತನಾಡು, **ಅನೃಗ್ವೇದವಿನೀತಸ್ಯ**=ಋಗ್ವೇದಾಧ್ಯಯನವನ್ನು ಮಾಡದಿರುವವನಿಗೆ, **ಅಯಜುರ್ವೇದಧಾರಿಣಃ** = ಯಜುರ್ವೇದವನ್ನು ಅಭ್ಯಾಸಮಾಡದಿರುವವನಿಗೆ, **ಅಸಾಮವೇದವಿದುಷಃ** = ಸಾಮವೇದದಲ್ಲಿ ಪಾಂಡಿತ್ಯವನ್ನು ಗಳಿಸದಿರುವವನಿಗೆ, **ಕೃತ್ಸ್ನಮ್**=ಸಂಪೂರ್ಣವಾದ, **ಬಹುಧಾ**=ಅನೇಕಸಾರಿ, **ಬ್ರುವಾಣಾ**=ಮಾತನಾಡುತ್ತಿರುವ, **ಗಾತ್ರೇಷು**=ಅವಯವಗಳಲ್ಲಿ, **ಲಲಾಟೇ** = ಹಣೆಯಲ್ಲಿ, **ಭ್ರುವೋಃ** = ಹುಬ್ಬುಗಳಲ್ಲಿ, **ಅವಿಲಮ್ಬಿತಾಮ್** = ಬಹಳ ನಿಧಾನವಲ್ಲದ, **ಕಲ್ಯಾಣೀಮ್** = ಶುಭಕರವಾದ, **ಚಿತ್ರಯಾ** = ಆಶ್ಚರ್ಯಕರವಾದ, **ತ್ರಿಸ್ಥಾನವ್ಯಞ್ಜನಸ್ಥಯಾ** = ಎದೆ, ಕಂಠ, ಶಿರಸ್ಸುಗಳಲ್ಲಿ ಸ್ಫುಟವಾಗಿ ಬರುವ, **ಅರ್ಥಾಃ** = ಕಾರ್ಯಗಳು, **ಉದ್ಯತಾಸೇಃ** = ಎತ್ತಿದ ಖಡ್ಗವುಳ್ಳ, **ಕಾರ್ಯಸಾಧಕಾಃ**=ಕೆಲಸವನ್ನು ಜೊಕ್ಕವಾಗಿ ಮಾಡುವ ಸೇವಕರು, **ಅದ್ರುತಾಮ್** =ಬಹಳ ವೇಗವಲ್ಲದ.

CC-O. In Public Domain. Digitized by eGangotri

सप्तमः पाठः

श्रीकृष्णस्य उपदेशः

कुरुक्षेत्रे सर्वे पाण्डवाः कौरवाः च युद्धाय सन्नद्धाः आसन्। अर्जुनः एकः महावीरः। तस्य सारथिः भगवान् श्रीकृष्णः। सः स्वस्य रिपून् कौरवान् हन्तुं समराङ्गणं प्रति धनुः, शस्त्राणि, अस्त्राणि च सङ्गृह्य रथेन सोत्साहं प्रस्थितः। उभयोः पक्षयोः सर्वे युद्धसन्नद्धाः अभवन्। तदा पार्थः सूतं श्रीकृष्णं प्रति वदति।

अर्जुनः—भगवन्, उभयोः सेनयोः मध्ये मे रथं स्थापय।

श्रीकृष्णः—सखे, कुतः?

अर्जुनः—अत्र के के उपस्थिताः इति प्रथमं पश्यामि।

श्रीकृष्णः—तथास्तु। [रथं मध्ये स्थापयति। अर्जुनः युद्धे सन्नद्धान् गुरून्, बन्धून्, मित्राणि च पश्यति।]

अर्जुनः—भगवन्, एते द्रोणादयः मम गुरवः। अयं गुरुपुत्रः अश्वत्थामा। एते शल्यादयः मातुलाः। इमे दुर्योधनादयः भ्रातरः। असौ भीष्मः—अस्मत् पितामहः। ते च मम वयस्याः। कथं नु एभिः साकं युध्येय?

[एवं वदतः तस्य गात्रं वेपते स्म। रोमाञ्चनं अभवत्। हृदयं अद्रवत्। गाण्डीवं धनुः हस्तात् परिच्युतम्। नेत्राभ्यां अश्रूण्यगलन्। ततः स दैन्येन कृष्णं उद्दिश्य विषण्णोऽवदत्]

Sri Vidyabharati Book Centre, Shringeri

CC-O. In Public Domain. Digitized by eGangotri

अर्जुनः—सखे! कथं एतान् गुरून्, बन्धून्, वयस्यान् च संहराणि? सर्वान् हत्वा प्राप्तेन राज्येन किं मे स्यात्? युद्धं तावत् हिंस्रं कर्म। एतैः सार्धं नाहं योद्धुमिच्छामि। ते एव धार्तराष्ट्राः राज्यं परिपालयन्तु। युद्धात् भिक्षया जीवनं एव वरम्। [इत्युक्त्वा तूष्णीं स्थितः]

तदा श्रीकृष्णः विषण्णं अर्जुनं एवं उपदिशति—"अये! महावीर, पार्थ! कुतः व्यामोहः? कुत्र गतं ते शौर्यम्? क्व यातः ते उत्साहः? पूर्ववृत्तं सर्वं स्मर किञ्चित्। त्वं क्षत्रियोऽसि दुष्टशिक्षणं शिष्टपरिपालनं च क्षत्रियाणां धर्मः। कर्तव्यं कर्म अप्रमत्तः श्रद्धया कुरु। न ते पापलेशोऽपि। श्रेयः ते भविष्यति।

"हतो वा प्राप्स्यसे स्वर्गं जित्वा वा भोक्ष्यसे महीम्।"
अतः दुष्टान् संहर। साधून् परिपालय। युद्धं हि क्षत्रियाणां धर्मः। स्वधर्मे निधनं श्रेयः। शत्रून् पराजयस्व। राज्यं लभस्व। यदि त्वं स्वधर्मेण वर्तसे तर्हि प्रजाः अपि धर्मेण वर्तन्ते। यथा राजा तथा प्रजाः। युध्यस्व विगतज्वरः। अयमेव ते मुख्यो धर्मः" इति।

यद्यदाचरति श्रेष्ठः तत्तदेवेतरो जनः।
स यत् प्रमाणं कुरुते लोकस्तदनुवर्तते॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अभ्यासः

I संस्कृतभाषया उत्तरं लिखत :—

कुरुक्षेत्रे के के युद्धसन्नद्धाः अभवन् ? श्रीकृष्णः कः ? अर्जुनः समराङ्गणं किमर्थं प्रस्थितः ? युद्धभूमौ अर्जुनः कान् कान् पश्यति ? अर्जुनस्य हस्तात् किं परिच्युतम् ?

II मातृभाषया उत्तरं लिखत :—

1. अर्जुनः कुतः विषण्णः ?
2. श्रीकृष्णस्य उपदेशं लिखत ।

III इमानि वाक्यानि पूरयत :—

1. भगवन्, एते द्रोणादयः मम ——— ।
2. एषः भीष्मः अस्मत् ——— ।
3. युद्धं तावत् ——— कर्म ।
4. युद्धात् ——— जीवनमेव वरम् ।
5. धनुः ——— परिच्युतम् ।

IV पर्यायपदानि वदत :—

रिपुः, समरः, धनुः, वयस्य ।

V एषां पदानां मध्ये स्थितं विजातीयपदं सूचयत :—

1. रामाय, आदाय, गुरवे, हरये
2. संगम्य, विजित्य, पश्य, प्रणम्य
3. मतिः, मुनिः, कविः, रविः
4. लोचनम्, आननम्, नयनम्, नेत्रम्

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ಶಬ್ದಾರ್ಥ

सन्नद्धाः = ಸಿದ್ಧರಾಗಿ, **अश्रूणि** = ಕಣ್ಣೀರು, **अगलन्** = ಸುರಿದವು, **हिंस्रम्** = ಕ್ರೂರವಾದ, **तूष्णीं** = ಸುಮ್ಮನೆ, **अप्रमत्तः** = ಎಚ್ಚರಿಕೆಯುಳ್ಳವನು, **लोकः** = ಜನ, **विषण्णः** = ವಿಷಾದಗೊಂಡ, **धार्तराष्ट्राः** = ಧೃತರಾಷ್ಟ್ರನ ಮಕ್ಕಳು, **निधनम्** = ಸಾವು, **विगतज्वरः** = ವ್ಯಥೆಯಿಲ್ಲದವನಾಗಿ.

ಕೃದಂತಾವ್ಯಯ

ಧಾತುವಿಗೆ **तुम्** (**तुमुन्**) ಪ್ರತ್ಯಯವು ಸೇರಿದರೆ **तुमुन्नन्ताव्यय** ವಾಗುತ್ತದೆ. ಎರಡು ಕ್ರಿಯೆಗಳಿದ್ದಾಗ ಫಲರೂಪವಾದ ಕ್ರಿಯೆಯನ್ನು ಬೋಧಿಸುವ ಧಾತುವಿನ ಮೆಲೆ ಈ ಪ್ರತ್ಯಯವು ಬರುತ್ತದೆ.

ಉದಾ :— '**भोक्तुं गच्छति**' ಇಲ್ಲಿ ಭೋಜನ, ಗಮನ ಎಂಬ ಎರಡು ಕ್ರಿಯೆಗಳುಂಟು. ಗಮನಕ್ಕೆ ಭೋಜನವು ಫಲ. ಆದ್ದರಿಂದ **भुज्** ಧಾತುವಿನ ಮೇಲೆ **तुमुन्** ಪ್ರತ್ಯಯವು ಬಂದಿದೆ.

हन्+तुम् = **हन्तुम्** **युध्+तुम्** = **योद्धुम्**।
पठ्+तुम् = **पठितुम्**। **जि+तुम्** = **जेतुम्**।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अष्टमः पाठः

पार्वती परमेश्वरं वक्रभणित्या पराजयते

पार्वती परमेश्वरस्य प्रेयसी। तयोः प्रीतिः निरतिशया। एकदा परशिवः एकाकी बहिः गत्वा गृहं प्रति निवर्तते। आगतं हृदयवल्लभं अगजा गवाक्षेणापश्यत्। तदानीं द्वारं पिहितं आसीत्। उद्घाटनार्थं शङ्करः कवाटं अङ्गुल्या प्रहरति। तदा गिरिजा सरससंल्लापेन तं पराजेतुं इच्छन्ती भणति।

पार्वती—अङ्गुल्या कवाटं कः प्रहरति ?

शिवः—अहमस्मि, प्रिये।

पा.—कः त्वम् ?

शि.—अहं शूली।

पा.—किम् ? किम् ? किं ते शूलरोगः वर्तते ? नाहं वैद्या। कञ्चित् वैद्यं प्रति याहि।

शि.—प्रियतमे ! अहं नीलकण्ठः।

पा.—किम् ? त्वं नीलकण्ठः। तर्हि एकां केकां कुरु।

शि.—प्रेयसि ! अहं पशुपतिः अस्मि।

पा.—अहो पशुपतिः ! कुत्र ते शृङ्गे !

शि.—अये, नाहं वृषभः। अहं स्थाणुः अस्मि।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

पा.—यदि त्वं स्थाणुः, कथं भाषसे ? स्थाणुः नाम शुष्कः तरुः ।

शि.—अहं शिवायाः पतिः अस्मि ।

पा.—किम् ? किम् ? शृगाल्याः पतिः शृगालोऽसि । वनं याहि । अत्र किं ते कार्यं अस्ति ?

एवं पार्वती शब्दच्छलेन शिवं पराजयत ।
तौ जगदादिमौ दम्पती अस्मान् पाताम् ॥

अभ्यासः

I संस्कृतभाषया उत्तरं लिखत :—

पार्वतीपरमेश्वरयोः प्रीतिः कीदृशी ? शङ्करः कवाटं कया प्रहरति ?

II पार्वतीपरमेश्वरयोः सरससँल्लापं मातृभाषया लिखत ।

III इतरवचनद्वयं लिखत :—

कुरुत, अस्मि, इच्छन्ति, प्रेयसी, स्थाणुषु ।

IV एषां सर्वाणि क्रियारूपाणि लिखत :—

याहि, अपश्यत्, पराजयत, पाताम् ।

V एषां विरुद्धार्थकपदानि लिखत :—

आगतः, अस्ति, बहिः, साधुः, स्वधर्मः ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ಶಬ್ದಾರ್ಥ

पराजयते = ಸೋಲಿಸುತ್ತಾಳೆ, वल्लभम् = ಪತಿಯನ್ನು, कवाटम् = ಬಾಗಿಲನ್ನು, शूली = ಈಶ್ವರ, ಹೊಟ್ಟೆನೋವುಳ್ಳವನು, नीलकण्ठः = ಈಶ್ವರ, ನವಿಲು, पशुपतिः = ಈಶ್ವರ, ವೃಷಭ, स्थाणुः = ಈಶ್ವರ, ಮೋಟುಮರ, शिवा = ಪಾರ್ವತಿ, ಹೆಣ್ಣುನರಿ, पाताम् = ರಕ್ಷಿಸಲಿ, शृगालः = ನರಿ, गवाक्षेण = ಕಿಟಕಿಯಿಂದ.

नवमः पाठः

सङ्घजीवी मानवः

प्राणिषु मानवः श्रेष्ठः। न तत्र कारणं शक्तिः आकारो वा। किन्तु असदृशी बुद्धिः विवेकः च। तथापि लोकेऽस्मिन् एकैकस्मात् प्राणिनः वस्तुनः च मानवस्य ज्ञातव्यं किञ्चित् विद्यते।

एतान् काकान् पश्यत। गृहात् बहिः क्षिप्ते अन्ने तूर्णं वायसाः 'का का' इति रटन्तः तत् परितः आयान्ति। विना कलहं सङ्घीभूय भक्षयन्ति। परं तु भिक्षुकाः अन्यं भिक्षुकं वीक्ष्य कलहं कुर्वन्ति। अत एवोक्तम् :—

काक आह्वयते काकान् याचको न तु याचकान्।
काकयाचकयोर्मध्ये वरं काको न याचकः॥ इति।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

इतः पश्यत, इमान् पालितान् शुनकान्। शुनकस्य स्वामिनि महती भक्तिः वर्तते। सः रात्रौ निद्राति। तथाति कस्मिंश्चित् शब्दे श्रुते झटिति उत्थाय उच्चैः भषति। प्रभुं शयनात् उत्थापयति। सः रात्रौ तस्करेभ्यः स्वामिनं रक्षति। अल्पेनैवाहारेण सन्तुष्यति च। अत एवोच्यते :—

बह्वाशी अल्पसन्तुष्टः सनिद्रः शीघ्रचेतनः।
प्रभुभक्तिश्च शौर्यं च मन्तव्याः षट् शुनो गुणाः॥

इति।

इतः एतान् भ्रमरान् विलोकयत। ते मधुरं गुञ्जन्ति। प्रतिपुष्पं भ्रमन्ति। कुसुमेभ्यः मकरन्दं चूषन्ति। पुष्पाणि न विनाशयन्ति। सुन्दरं मधुकोशं निर्मान्ति। तस्मिन् मधु उत्पादयन्ति। सदपि ते तत् न पिबन्ति। यदा कदा वा पिबामः इति सञ्चिन्वन्ति। परं तु तन्मधु मानवेनापहियते। एषां मधुपानां व्यवहारेण सञ्चयबुद्धिं शिक्षामहे। एवमेव पिपीलिकाः अपि सञ्चये परमकुशलाः सङ्घीभूय कार्यं कुर्वन्ति च।

तथा पृथिवी, आपः, तेजः, वायुः, आकाशः इति पञ्चभूतान्यपि परोपकारायैव निर्मितानि। मानवः एकैकस्मात् प्राणिनः वस्तुनः च एकैकं उत्तमं गुणं सङ्गृह्य कुशलो भवेत्।

क्षणशः कणशश्चैव विद्यामर्थं च साधयेत्।
क्षणे नष्टे कुतो विद्या कणे नष्टे कुतो धनम्॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अभ्यासः

I संस्कृतभाषया उत्तरं लिखत :—

प्राणिषु कः श्रेष्ठः ? भिक्षुकाः किं कुर्वन्ति ? शुनकस्य कस्मिन् भक्तिः वर्तते ? वरं काकः — कुतः ? मधुपानां व्यवहारेण किं शिक्षामहे ? विद्यां अर्थं च कथं साधयेत् ?

II मातृभाषया उत्तरं लिखत :—

1. शुनकस्य गुणान् वदत ।
2. भ्रमरस्य कृत्यं विशदयत ।

III सम्यक् योजयत :—

(अ)	(आ)
श्वा	गुञ्जति
तस्करः	भषति
भ्रमरः	चोरयति
पिपीलिका	रटति
काकः	सञ्चिनोति

IV रिक्तस्थानेषु योग्यपदानि योजयत :—

भ्रमराः मधु——— । काकः काकान्——— ।

———उच्चैः भषति । ———का का इति रटन्ति ।

V सन्धिं विगृह्य सन्धिनाम वदत :—

अल्पेनैवाहारेण । मानवेनापह्रियते ।

परोपकारायैव । लोकेऽस्मिन् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

शब्दार्थः

असदृशी = ಎಣೆಯಿಲ್ಲದ, परितः = ಸುತ್ತಲೂ, तूर्णं, झटिति सपदि = ಬೇಗ, वीक्ष्य = ನೋಡಿ, उत्थाय = ಎದ್ದು, उच्चैः = ಗಟ್ಟಿ, ಯಾಗಿ, आपः = ನೀರು, मधुकोशः = ಜೇನುಗೂಡು, चूषन्ति = ಹೀರುತ್ತವೆ, कणशः = ಕಾಳುಕಾಳಾಗಿ, पिपीलिका = ಇರುವೆ.

दशमः पाठः

नन्दिनीवरप्रदानम्

कामधेनोः दुहिता नन्दिनी। सा वसिष्ठमहर्षेः होमधेनुः। एकदा भूपतिः दिलीपः सन्ततिहीनः पत्न्या सुदक्षिणया समं कुलगुरोः वसिष्ठस्याश्रमं गतः। तौ दम्पती सन्तत्युपरोधस्य निवारणं कर्तव्यमिति वसिष्ठं प्रार्थयामासतुः।

कुलगुरुः निध्यानेन कारणं निर्धार्य नन्दिनीं प्रत्यहं उपासितुं आदिशत्।

तौ दम्पती सभक्तिश्रद्धं तां धेनुं उपचरतः स्म। एवं एकविंशति दिनानि व्यतीतानि। परेद्युः नन्दिनी हरितानि तृणानि भक्षयन्ती गुहामेकां प्राविशत्। दिलीपः तां छायेवान्वसरत्। परं तु तस्य चित्तं परितः स्थितेन प्रकृतिसौन्दर्येणाकृष्टं अभूत्।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

तदैकः कण्ठीरवः गर्जन् तां पयस्विनीं आक्रमत् । सहसा नृपतिः तं हन्तुं प्रायतत । परं तु सिंहस्य प्रभावं किं वदामः ? दिलीपः स्वहस्तपादप्रसारणेऽप्यशक्तोऽभवत् । भित्तौ लिखित-चित्रमिवातिष्ठत् । तदा सिंहः मनुष्यवाण्या सस्मितं अवदत् ।

सिंहः—अये महीपाल, अलं श्रमेण । नाहं साधारणः सिंहः । अहं परमेश्वरस्य किङ्करः । मम नाम कुम्भोदरः । अहं निकुम्भस्य मित्रम् । एतं देवदारुतरुं वन्यगजेभ्यः परिरक्षितुमादिष्टोऽस्मि । एषा गौः ममाहारः । मुञ्चैनाम् । गृहं प्रतिगच्छ ।

दिलीपः—भो मृगराज, भवानिवाहमपि परवान् । एषा मम गुरोः होमधेनुः । मुञ्चैनाम् । मां भक्षय ।

सिंहः—अये नरपते, भवान् असमीक्ष्यकारी । अल्पस्य कृते अमूल्यं शरीरं कुतः त्यजसि ? अस्याः कृते अपारं गोधनं गुरवे दत्वा तं परितोषय । अहं क्षुधितोऽस्मि । इमां भक्षयित्वा तृप्तो भविष्यामि । गां परित्यज्य तूष्णीं गच्छ ।

दिलीपः—भो मृगराज, अहं जात्या क्षत्रियः । दुःखात् (क्षतात्) त्राणमेव मम धर्मः । स्वधर्मं परित्यज्य इदमशाश्वतं शरीरं पोषयितुं नेच्छामि ।

"सम्भावितस्य चाकीर्तिः मरणात् अतिरिच्यते ।"

भक्षय मे शरीरम् । मुञ्चैनाम् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

श्रुत्वैतत् वचनं प्रसन्नः सिंहः ओम् इत्यवोचत्। प्रहृष्टो दिलीपः शिरः अवनम्य पुरतः स्थितः। क्षणादेव सः "उत्तिष्ठ वत्स" इति शब्दं श्रुतवान्। नासीत तत्र सिंहः। केवलां स्मितवदनां नन्दिनीं आलोक्य दिलीपः चकितोऽभवत्।

तदा नन्दिनीं प्राह— "भो राजन्, अहमेव त्वां परीक्षितवती। सिंहोदन्तः मृषैव। तुष्टास्मि ते भक्त्या। मम दुग्धं पिब। सन्ततिः ते भविता" इत्यन्वगृह्णात्। दिलीपः गुर्वनुग्रहं प्राप्य दुग्धं निपीय सुदक्षिणायां सुपुत्रं प्राप। सः पुत्रः एव रविकुलतिलकः रघुमहाराजः।

अभ्यास

I संस्कृतभाषया उत्तरं लिखत :—

नन्दिनी का? सा कस्य होमधेनुः? दिलीपः कस्य आश्रमं गतः? तौ दम्पती वसिष्ठं किं प्रार्थयामासतुः? कुलगुरुः तौ किमादिशत्? नन्दिनीं कः आक्रमत्? नन्दिनी दिलीपं किं अन्वगृह्णात्?

II मातृभाषया उत्तरं लिखत :—

1. नन्दिनी दिलीपं कथं परीक्षितवती?
2. दिलीपसिंहयोः सम्भाषणं विवृणुत।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

III वाक्यदोषान् समीकुरुत :—

1. तौ दम्पती धेनुं उपचरति स्म ।
2. अहं निकुम्भस्य मित्रः ।
3. भो मृगराजन्, अहं जात्या क्षत्रियः ।
4. दिलीपः पत्न्याः समं गतः ।

IV ससन्दर्भं विवृणुत :—

1. त्वं असमीक्ष्यकारी ।
2. सम्भावितस्य चाकीर्तिः मरणादतिरिच्यते ।

V सन्धिं विगृह्य सन्धिनाम लिखत :—

हस्तपादप्रसारणेऽप्यशक्तोऽभवत्, इत्यन्वगृह्णात्,
सिंहोदन्तः, मृषैव, गुर्वनुग्रहम् ।

ಶಬ್ದಾರ್ಥ

दुहिता=ಮಗಳು, उपरोधस्य=ತಡೆಗೆ, निध्यानेन=ನೆಟ್ಟದೃಷ್ಟಿಯಿಂದ, निर्धार्य=ನಿಶ್ಚಯಿಸಿ, छाया=ನೆರಳು, कण्ठीरवः=ಸಿಂಹ, पयस्विनीं=ಹಸುವನ್ನು, भित्तौ=ಗೋಡೆಯ ಮೇಲೆ, किङ्करः=ಸೇವಕ, परवान्=ಪರಾಧೀನ, क्षुधितः=ಹಸಿದವನು, तूष्णीम्=ಸುಮ್ಮನೆ, ओम्=ಆಗಲಿ, अवनम्य=ಬಗ್ಗಿ, उदन्तः=ಸಮಾಚಾರ, मृषा=ಸುಳ್ಳು, भविता=ಆಗುವುದು, निपीय=ಕುಡಿದು.

CC-O. In Public Domain. Digitized by eGangotri

एकादशः पाठः

छान्दसानां कविता

पुरा धारानगरे भोजो नाम संस्कृतभाषाप्रियः भूपतिः राज्यं अपालयत्। तस्य आस्थाने बहवः विद्वांसः कवयः च अवर्तन्त। भोजः स्वयं पण्डितः काव्यज्ञः कविः च अभूत्। चम्पूरामायणं नाम मनोज्ञं काव्यं भोजेन प्रणीतम्। सः नृपतिः कवीन् विशेषेण पुरस्कृत्य तेभ्यः पुष्कलं धनं प्रयच्छतीति कीर्तिः सर्वत्र प्रसृतासीत्। राजसभायां कालिदासादयः बहवः कवयः व्यराजन्त।

नरपतिं कवित्वप्रियं ज्ञात्वा केचित् छान्दसाः धारानगरं आगच्छन्। ते श्रुतिस्मृत्यादिषु प्रवीणाः, परं तु कवित्वे न कुशलाः। ते वैदिकाः नगरस्थं भुवनेश्वरीमन्दिरं गत्वा 'कवित्वं करिष्यामः' इत्युपविष्टाः। चिरं आलोच्य तेष्वन्यतमः श्लोकस्य प्रथमं पादं अरचयत् "भोजनं देहि राजेन्द्र" इति। ततः महता यत्नेन अन्यः द्वितीयं पादं एवं अपूरयत् "घृतसूप-समन्वितम्" इति। तदा एवं तैः छान्दसैः प्रथमार्धं रचितम्। द्वितीयार्धं कथमपि नास्फुरत्। सर्वे चिन्ताकुलाः जाताः।

तस्मिन् एव समये देवताभवनं कालिदासः प्रणामार्थं आगतः। सः वैदिकान् दृष्ट्वा तेषां वृत्तान्तं अपृच्छत्। ते च

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

स्वीयं वृत्तं निवेद्य स्वकृतं श्लोकार्धं अदर्शयन्। "उत्तरार्धं न स्फुरति" इति च अब्रुवन्। कालिदासः स्मित्वा उत्तरार्धं एवं अब्रवीत् "माहिषं च शरच्चन्द्रचन्द्रिकाधवलं दधि" इति।

परेद्युः ते छान्दसाः राजसभां प्रविश्य भोजराजस्य पुरतः इमं श्लोकं अपठन्—

भोजनं देहि राजेन्द्र घृतसूपसमन्वितम्।
माहिषं च शरच्चन्द्रचन्द्रिकाधवलं दधि॥

धारेश्वरो भोजः तत्पद्यमाकर्ण्य "येन पूर्वार्धं प्रयासेन निर्मितं तेन पुनः कदाचिदति कवित्वे श्रमो न कर्तव्यः। उत्तरार्धस्य किञ्चित् पारितोषिकं दातुं इच्छामि, न पूर्वार्धस्य" इत्युक्त्वा सुवर्णनिष्कान् दत्वा तान् विप्रान् व्यसर्जयत्।

कान् पृच्छामः सुराः स्वर्गे निवसामो वयं भुवि।
किं वा काव्यरसः स्वादुः किं वा स्वादीयसी सुधा।

अभ्यासः

I संस्कृतभाषया उत्तरं लिखत :—

धारानगरस्य भूपतिः कः? तस्य सभायां के के अवर्तन्त? भोजेन प्रणीतं काव्यं किम्? छान्दसाः किमर्थं धारानगरमागच्छन्? कालिदासः किमर्थं देवताभवनं आगतः?

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

II मातृभाषया उत्तरं लिखत :—

1. छान्दसाः किमर्थं चिन्ताकुलाः जाताः ?
2. धारेश्वरः पूर्वार्धस्य पारितोषिकं कुतो नायच्छत् ?

III पर्यायशब्दान् लिखत :—

सुधा, भूपतिः, वृत्तान्तः, अब्रवीत्, सुवर्णम्।

IV सन्धिं विगृह्य सन्धिनाम वदत :—

राजेन्द्रः, तेष्वन्यतमः, प्रथमार्धम्, इत्युक्त्वा।

शब्दार्थ

छान्दसाः = ವೇದವನ್ನು ತಿಳಿದವರು, मनोज्ञम् = ಸುಂದರವಾದ, पुष्कलम् = ಬಹಳ, न अस्फुरत् = ಹೊಳೆಯಲಿಲ್ಲ, निवेद्य = ತಿಳಿಸಿ, घृतसूपसमन्वितम् = ತುಪ್ಪ ತೊವ್ವೆಗಳಿಂದ ಕೂಡಿದ, माहिषं दधि = ಎಮ್ಮೆಯ ಮೊಸರು, सुवर्णनिष्कान् = ಚಿನ್ನದ ನಾಣ್ಯಗಳನ್ನು, स्वादीयसी = ಅತ್ಯಂತ ರುಚಿಕರವಾದ, शरच्चन्द्रचन्द्रिकाधवलम् = ಶರತ್ಕಾಲದ ಚಂದ್ರನ ಬೆಳದಿಂಗಳಿನಂತೆ ಬೆಳ್ಳಗಿರುವ.

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

द्वादशः पाठः

सुभाषितानि

(ಕಂಠಪಾಠಕ್ಕೆ)

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः ।
तस्मात् तदेव वक्तव्यं वचने का दरिद्रता ॥ १ ॥

मन्त्रे तीर्थे द्विजे देवे दैवज्ञे भेषजे गुरौ ।
यादृशीं भावनां कुर्यात् सिद्धिर्भवति तादृशी ॥ २ ॥

न देवा दण्डमादाय रक्षन्ति पशुपालवत् ।
यं तु रक्षितुमिच्छन्ति सद्बुध्या योजयन्ति तम् ॥ ३ ॥

ज्ञानवृद्धा वयोवृद्धा विद्यावृद्धास्तपोधनाः ।
एते वै द्वारि तिष्ठन्ति धनवृद्धस्य किङ्कराः ॥ ४ ॥

अफलानि दुरन्तानि समव्ययफलानि च ।
अशक्यानि च कार्याणि नारभेत विचक्षणः ॥ ५ ॥

कर्ता कारयिता चैव प्रेरकश्चानुमोदकः ।
सुकृते दुष्कृते चैव चत्वारः समभागिनः ॥ ६ ॥

पुण्यस्य फलमिच्छन्ति पुण्यं नेच्छन्ति मानवाः ।
न पापफलमिच्छन्ति पापं कुर्वन्ति यत्नतः ॥ ७ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अनाहूताः स्वयं यान्ति रसास्वादविलोलुपाः ।
निवारिता न गच्छन्ति मक्षिका इव भिक्षुकाः ॥ ८ ॥

आशा नाम मनुष्याणां काचिदाश्चर्यशृङ्खला ।
यया बद्धाः प्रधावन्ति मुक्तास्तिष्ठन्ति पङ्गुवत् ॥ ९ ॥

धनवन्तमदातारं दरिद्रं चातपस्विनम् ।
मज्जयेदर्णवेऽशङ्कं कण्ठे बद्ध्वा दृढां शिलाम् ॥ १० ॥

अभ्यासः

I संस्कृतभाषया उत्तरं लिखित :—

जन्तवः केन तुष्यन्ति ? धनवृद्धस्य किङ्कराः के ? विचक्षणः कीदृशानि कार्याणि नारभेत ? चत्वारः समभागिन :— के ? के ? मानवा किमिच्छन्ति ? किं नेच्छन्ति ? कौ अर्णवे मज्जयेत् ?

II ससन्दर्भं विशदयत :—

सद्बुद्धया योजयन्ति तम् । मक्षिका इव भिक्षुकाः । मुक्तास्तिष्ठन्ति पङ्गुवत् ।

शब्दार्थः

दैवज्ञे = ಜ್ಯೋತಿಷ್ಯನಲ್ಲಿ, मेषजे = ವೈದ್ಯನಲ್ಲಿ, द्वारि = ಬಾಗಿಲಿನಲ್ಲಿ, वृद्धाः = ಪಂಡಿತರು (ವಯೋವೃದ್ಧರು), दूरतः = ದೂರದಲ್ಲಿ

Sri Vidyabharathi Book Centre, Shringeri

CC-O. In Public Domain. Digitized by eGangotri

ದುಃಖ ನೀಡುವ, **समव्ययफलानि**=ಲಾಭನಷ್ಟಗಳಲ್ಲಿ ಸಮಾನವಾದ, **विचक्षणः**=ಪಂಡಿತ, **अनुमोदकः**=ಒಪ್ಪಿಗೆ ನೀಡುವವನು, **अनाहृताः**=ಕರೆಯಲ್ಪಡದವರು, **विलोलुप्ताः**=ಆಸೆಯುಳ್ಳವರು, **निवारिताः**=ತಡೆಯಲ್ಪಟ್ಟರೂ, **मक्षिका**=ನೊಣ, **शृङ्खला**=ಸಂಕೋಲೆ (ಬೇಡಿ), **पङ्गुवत्**=ಕುಂಟನಂತೆ, **अशङ्कम्**=ಸಂದೇಹವಿಲ್ಲದೆ.

लोकोक्तयः (ಕಂಠಪಾಠಕ್ಕೆ)

೧. **न निश्चितार्थाद्विरमन्ति धीराः ।**
ಧೀರರು ತಾವು ನಿಶ್ಚಯಿಸಿದ ಕಾರ್ಯವನ್ನು ಬಿಡುವುದಿಲ್ಲ.

೨. **सहसा विदधीत न क्रियाम् ।**
ಆತುರದಿಂದ (ವಿಚಾರ ಮಾಡದೆ) ಕೆಲಸವನ್ನು ಮಾಡಬಾರದು.

೩. **हितं मनोहारि च दुर्लभं वचः ।**
ಹಿತವೂ ಮನೋಹರವೂ ಆದ ಮಾತು ಅಪರೂಪ.

೪. **अङ्गीकृतं सुकृतिनो न परित्यजन्ति ।**
ಪುಣ್ಯಾತ್ಮರು ತಾವು ಒಪ್ಪಿಕೊಂಡ ಕಾರ್ಯವನ್ನು ಎಂದಿಗೂ ಬಿಡುವುದಿಲ್ಲ.

೫. **न वंशवृक्षेषु फलन्ति द्राक्षाः ।**
ಬಿದಿರು ಮೆಳೆಗಳಲ್ಲಿ ದ್ರಾಕ್ಷಿಹಣ್ಣು ಬಿಡುವುದಿಲ್ಲ.

೬. **अग्निदाहादपि विशिष्टं वाक्पारुष्यम् ।**
ಬಿರುನುಡಿಯು ಬೆಂಕಿಯು ಕಾವಿನಿಂತಲೂ ಹೆಚ್ಚು ಭಯಂಕರ.

Sri Vidyabharathi Book Centre, Shirsi

CC-O. In Public Domain. Digitized by eGangotri

೭. अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति ।
ತಪ್ಪುದಾರಿಯಲ್ಲಿ ಹೋಗುತ್ತಿರುವವನನ್ನು ಸೋದರನೂ ಸಹ ತ್ಯಜಿಸುತ್ತಾನೆ.

೮. अवयवशक्तेः समुदायशक्तिर्बलीयसी ।
ವ್ಯಕ್ತಿಶಕ್ತಿಗಿಂತ ಸಾಮೂಹಿಕ ಶಕ್ತಿಯು ಬಲಿಷ್ಠವಾದುದು.

೯. चक्रवत् परिवर्तन्ते दुःखानि च सुखानि च ।
ಸುಖದುಃಖಗಳು ಚಕ್ರದಂತೆ ಉರುಳುತ್ತಿರುತ್ತವೆ.

೧೦. गतः कालो न पुनरायाति ।
ಕಳೆದುಹೋದ ಕಾಲವು ಮತ್ತೆ ಬರುವುದಿಲ್ಲ.

क्रियारूपाणि

आत्मनेपदम्—लट्+वर्तमानकाल

धातुः+विकरणप्रत्ययः+आख्यातप्रत्ययः=क्रियापदम्

विकरणप्रत्ययाः

1ನೇ ಗಣ	4ನೇ ಗಣ	6ನೇ ಗಣ	10ನೇ ಗಣ
अ	य	अ	अय

आख्यातप्रत्ययाः

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथम पुरुषः	ते	इते	अन्ते
मध्यम पुरुषः	से	इथे	ध्वे
उत्तम पुरुषः		वहे	महे

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ಉದಾ :—वन्द् = ವಂದಿಸು

1ನೇ ಗಣ वन्द्+अ+ते = वन्दते

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्र. पु.	वन्दते	वन्देते	वन्दन्ते
म. पु.	वन्दसे	वन्देथे	वन्दध्वे
उ. पु.	वन्दे	वन्दावहे	वन्दामहे

मन् = ತಿಳಿ

4ನೇ ಗಣ मन्+य+ते = मन्यते

मन्यते	मन्येते	मन्यन्ते
मन्यसे	मन्येथे	मन्यध्ये
मन्ये	मन्यावहे	मन्यामहे

लज्ज् = ನಾಚಿಕೆಪಡು

6ನೇ ಗಣ लज्ज्+अ+ते = लज्जते

लज्जते	लज्जेते	लज्जन्ते
लज्जसे	लज्जेथे	लज्जध्वे
लज्जे	लज्जावहे	लज्जामहे

मृग् = ಹುಡುಕು

10ನೇ ಗಣ मृग्+अय+ते = मृगयते

मृगयते	मृगयेते	मृगयन्ते
मृगयसे	मृगयेथे	मृगयध्ये
मृगये	मृगयावहे	मृगयामहे

Sri Vidyabhaskar Digital Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ವಿ.ಸೂ. :—ಪ್ರಥಮಪುರುಷ ಬಹುವಚನ ಮತ್ತು ಉತ್ತಮ ಪುರುಷ ದಲ್ಲಿ ಆಗುವ ವ್ಯತ್ಯಾಸಗಳನ್ನು ಪರಸ್ಮೈಪದಿಯಂತೆ ಗಮನಿಸಬೇಕು.

लोट्=आज्ञार्थ

परस्मैपद—आख्यातप्रत्ययगळु

तु, तात्	ताम्	अन्तु
(हि) तात्	तम्	त
आनि	आव	आम

ऒंदनेय गण पठ्=धातु

पठतु, पठतात्	पठताम्	पठन्तु
पठ, पठतात्	पठतम्	पठत
पठानि	पठाव	पठाम

आत्मनेपद—आख्यातप्रत्ययगळु

ताम्	इताम्	अन्ताम्
स्व	इथाम्	ध्वम्
ऐ	वहै	महै

ऒंदनेय गण लभ्=धातु

लभताम्	लभेताम्	लभन्ताम्
लभस्व	लभेथाम्	लभध्वम्
लभै	लभावहै	लभामहै

Sri Vidyabharathi Book Centre, Sirigere

CC-O. In Public Domain. Digitized by eGangotri

ಹೀಗೆಯೇ 4, 6 ಮತ್ತು 10ನೇ ಗಣದ ಧಾತುಗಳ ಕ್ರಿಯಾರೂಪ ಗಳನ್ನು ತಿಳಿಯಬೇಕು. लोट् ಲಕಾರದಲ್ಲಿ ಆಕಾರದ ಮುಂದಿರುವ हि ಪ್ರತ್ಯಯವು ಲೋಪವಾಗುತ್ತದೆ.

ವಿಶೇಷ ಕ್ರಿಯಾಪದ

अस्—ಧಾತು=ಇರು

अस्तु, स्तात्	स्ताम्	सन्तु
एधि, स्तात्	स्तम्	स्त
असानि	असाव	असाम

कृ—ಧಾತು=ಮಾಡು

करोतु, कुरुतात्	कुरुताम्	कुर्वन्तु
कुरु, कुरुतात्	कुरुतम्	कुरुत
करवाणि	करवाव	करवाम

लङ्=ಅನದ್ಯತನ ಭೂತಕಾಲ

लङ् ಲಕಾರವು ಕೆಲಸವು ಹಿಂದೆ ನಡೆದುದನ್ನು ಸೂಚಿಸುವುದು. ಧಾತುವಿಗೆ ಆಯಾಯ ಗಣದ ವಿಕರಣ ಪ್ರತ್ಯಯವನ್ನೂ, ಆಖ್ಯಾತ ಪ್ರತ್ಯಯವನ್ನೂ ಸೇರಿಸಿ, ಧಾತುವಿನ ಮೊದಲು अ ಎಂಬ ಆಗಮವನ್ನು ಸೇರಿಸಿದರೆ लङ् ಲಕಾರದ ಕ್ರಿಯಾರೂಪವಾಗುತ್ತದೆ. ಹೀಗೆ ರೂಪಗಳನ್ನು ಸಿದ್ಧಪಡಿಸುವಾಗ ಆಗುವ ಸಂಧಿಕಾರ್ಯಗಳನ್ನು ಗಮನಿಸಬೇಕು.

अ+धातु+विकरण+आख्यातप्रत्यय=क्रियापदम् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

लङ् परस्मैपद—आख्यातप्रत्ययगळु

त्	ताम्	अन्
स्	तम्	त
म्	व	म

नम् धातु अ+नम्+अ+त्=अनमत्

अनमत्	अनमताम्	अनमन्
अनमः	अनमतम्	अनमत
अनमम्	अनमाव	अनमाम

लङ् आत्मनेपद—आख्यातप्रत्ययगळु

त	इताम्	अन्त
थाः	इथाम्	ध्वम्
इ	वहि	महि

याच् धातु अ+याच्+अ+त=अयाचत

अयाचत	अयाचेताम्	अयाचन्त
अयाचथाः	अयाचेथाम्	अयाचध्वम्
अयाचे	अयाचावहि	अयाचामहि

ಹೀಗೆಯೇ 4, 6 ಮತ್ತು 10ನೇ ಗಣದ ಧಾತುಗಳ ಕ್ರಿಯಾರೂಪಗಳನ್ನು ತಿಳಿಯಬೇಕು.

ವಿ. ಸೂ. :—ಧಾತುವಿಗೆ ಉಪಸರ್ಗವು ಸೇರಿದ್ದರೆ ಅ ಎಂಬ ಆಗಮವು ಧಾತುವಿನ ಆದಿಗೆ ಬರುತ್ತದೆ ಉಪಸರ್ಗದ ಆದಿಗೆ ಬರುವುದಿಲ್ಲ. ಆಖ್ಯಾತ ಪ್ರತ್ಯಯಗಳನ್ನು ಸೇರಿಸುವಾಗ ಆಗುವ ಸಂಧಿಕಾರ್ಯಗಳನ್ನು ಗಮನಿಸಬೇಕು.

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ಉದಾ. :—वि+अ+सृज्+अ+त्=व्यसृजत्

उत्+अ+तार् (तृ)+अय+त्=उदतारयत्

ವಿಶೇಷ ಕ್ರಿಯಾಪದ

अस्—ಧಾತು=ಇರು

आसीत्	आस्ताम्	आसन्
आसीः	आस्तम्	आस्त
आसम्	आस्व	आस्म

कृ—ಧಾತು=ಮಾಡು

अकरोत्	अकुरुताम्	अकुर्वन्
अकरोः	अकुरुतम्	अकुरुत
अकरवम्	अकुर्व	अकुर्म

ब्रू—ಧಾತು=ಹೇಳು

अब्रवीत्	अब्रूताम्	अब्रुवन्
अब्रवीः	अब्रूतम्	अब्रूत
अब्रवम्	अब्रूव	अब्रूम

श्रु—ಧಾತು=ಕೇಳು

अश्रृणोत्	अश्रृणुताम्	अश्रृण्वन्
अश्रृणोः	अश्रृणुतम्	अश्रृणुत
अश्रृणवम्	अश्रृण्व	अश्रृण्म

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

शब्दरूपाणि

इकारान्तः पुँल्लिङ्गः हरि शब्दः—ಎಷ್ಟನೆ

	ए.	द्वि.	ब.
प्र.	हरिः	हरी	हरयः
सं.प्र.	हे हरे	हे हरी	हे हरयः
द्वि.	हरिम्	हरी	हरीन्
तृ.	हरिणा	हरिभ्याम्	हरिभिः
च.	हरये	हरिभ्याम्	हरिभ्यः
पं.	हरेः	हरिभ्याम्	हरिभ्यः
ष.	हरेः	हर्योः	हरीणाम्
स.	हरौ	हर्योः	हरिषु

उकारान्तः पुँल्लिङ्गः शम्भु शब्दः—ಎಷ್ಟನೆ

	ए.	द्वि.	ब.
प्र.	शम्भुः	शम्भू	शम्भवः
सं.प्र.	हे शम्भो	हे शम्भू	हे शम्भवः
द्वि.	शम्भुम्	शम्भू	शम्भून्
तृ.	शम्भुना	शम्भुभ्याम्	शम्भुभिः
च.	शम्भवे	शम्भुभ्याम्	शम्भुभ्यः
पं.	शम्भोः	शम्भुभ्याम्	शम्भुभ्यः
ष.	शम्भोः	शम्भ्वोः	शम्भूनाम्
स.	शम्भौ	शम्भ्वोः	शम्भुषु

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ऋकारान्तः पुँल्लिङ्गः पितृ शब्दः— ತಂದೆ

	ए.	द्वि.	ब.
प्र.	पिता	पितरौ	पितरः
सं.प्र.	हे पितः	हे पितरौ	हे पितरः
द्वि.	पितरम्	पितरौ	पितॄन्
तृ.	पित्रा	पितृभ्याम्	पितृभिः
च.	पित्रे	पितृभ्याम्	पितृभ्यः
पं.	पितुः	पितृभ्याम्	पितृभ्यः
ष.	पितुः	पित्रोः	पितॄणाम्
स.	पितरि	पित्रोः	पितृषु

ऋकारान्तः पुँल्लिङ्गः धातृ शब्दः—ಬ್ರಹ್ಮ

	ए.	द्वि.	ब.
प्र.	धाता	धातारौ	धातारः
सं.प्र.	हे धातः	हे धातारौ	हे धातारः
द्वि.	धातारम्	धातारौ	धातॄन्
तृ.	धात्रा	धातृभ्याम्	धातृभिः
च.	धात्रे	धातृभ्याम्	धातृभ्यः
पं.	धातुः	धातृभ्याम्	धातृभ्यः
ष.	धातुः	धात्रोः	धातॄणाम्
स.	धातरि	धात्रोः	धातृषु

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

इकारान्तः स्त्रीलिङ्गः मति शब्दः—ಮತಿ

	ए.	द्वि.	ब.
प्र.	मतिः	मती	मतयः
सं.प्र.	हे मते	हे मती	हे मतयः
द्वि.	मतिम्	मती	मतीः
तृ.	मत्या	मतिभ्याम्	मतिभिः
च.	मत्यै (मतये)	मतिभ्याम्	मतिभ्यः
पं.	मत्याः (मतेः)	मतिभ्याम्	मतिभ्यः
ष.	मत्याः (मतेः)	मत्योः	मतीनाम्
स.	मत्याम् (मतौ)	मत्योः	मतिषु

ईकारान्तः स्त्रीलिङ्गः नदी शब्दः—ನದಿ

	ए.	द्वि.	ब.
प्र.	नदी	नद्यौ	नद्यः
सं.प्र.	हे नदि	हे नद्यौ	हे नद्यः
द्वि.	नदीम्	नद्यौ	नदीः
तृ.	नद्या	नदीभ्याम्	नदीभिः
च.	नद्यै	नदीभ्याम्	नदीभ्यः
पं.	नद्याः	नदीभ्याम्	नदीभ्यः
ष.	नद्याः	नद्योः	नदीनाम्
स.	नद्याम्	नद्योः	नदीषु

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

उकारान्तः स्त्रीलिङ्गः धेनु शब्दः—ಹಸು

	ए.	द्वि.	ब.
प्र.	धेनुः	धेनू	धेनवः
सं.प्र.	हे धेनो	हे धेनू	हे धेनवः
द्वि.	धेनुम्	धेनू	धेनूः
तृ.	धेन्वा	धेनुभ्याम्	धेनुभिः
च.	धेन्वै (धेनवे)	धेनुभ्याम्	धेनुभ्यः
पं.	धेन्वाः (धेनोः)	धेनुभ्याम्	धेनुभ्यः
ष.	धेन्वाः (धेनोः)	धेन्वोः	धेनूनाम्
स.	धेन्वाम् (धेनौ)	धेन्वोः	धेनुषु

ऋकारान्तः स्त्रीलिङ्गः मातृ शब्दः—ತಾಯಿ

	ए.	द्वि.	ब.
प्र.	माता	मातरौ	मातरः
सं.प्र.	हे मातः	हे मातरौ	हे मातरः
द्वि.	मातरम्	मातरौ	मातॄः
तृ.	मात्रा	मातृभ्याम्	मातृभिः
च.	मात्रे	मातृभ्याम्	मातृभ्यः
पं.	मातुः	मातृभ्याम्	मातृभ्यः
ष.	मातुः	मात्रोः	मातॄणाम्
स.	मातरि	मात्रोः	मातृषु

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ओकारान्तः उभयलिङ्गः गो शब्दः—ಹಸು, ಎತ್ತು

	ए.	द्वि.	ब.
प्र.	गौः	गावौ	गावः
सं.प्र.	हे गौः	हे गावौ	हे गावः
द्वि.	गाम्	गावौ	गाः
तृ.	गवा	गोभ्याम्	गोभिः
च.	गवे	गोभ्याम्	गोभ्यः
पं	गोः	गोभ्याम्	गोभ्यः
ष.	गोः	गवोः	गवाम्
स.	गवि	गवोः	गोषु

इकारान्तः नपुंसकलिङ्गः वारि शब्दः—ನೀರು

	ए.	द्वि.	ब.
प्र	वारि	वारिणी	वारीणि
सं.प्र.	हे वारे, हे वारि	हे वारिणी	हे वारीणि
द्वि.	वारि	वारिणी	वारीणि
तृ.	वारिणा	वारिभ्याम्	वारिभिः
च.	वारिणे	वारिभ्याम्	वारिभ्यः
पं.	वारिणः	वारिभ्याम्	वारिभ्यः
ष.	वारिणः	वारिणोः	वारीणाम्
स.	वारिणि	वारिणोः	वारिषु

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

षष्टिसंवत्सराः (60 ಸಂವತ್ಸರಗಳು)

(ಕಂಠಪಾಠ ಮಾಡಿರಿ)

प्रभवो विभवः शुक्लः प्रमोदूतः प्रजापतिः ।
आङ्गिरः श्रीमुखो भावो युवो धातुस्तथेश्वरः ॥ १ ॥

बहुधान्यः प्रमाथी च विक्रमो विषुवत्सरः ।
चित्रभानुः स्वभानुश्च तारणः पार्थिवो व्ययः ॥ २ ॥

सर्वजित्सर्वधारी च विरोधी विकृतिः खरः ।
नन्दनो विजयश्चैव जयो मन्मथदुर्मुखौ ॥ ३ ॥

हेविलम्बो विलम्बश्च विकारी शार्वरिः प्लवः ।
शुभकृत् शोभकृत् क्रोधी विश्वावसुपराभवौ ॥ ४ ॥

प्लवङ्गः कीलकः सौम्यः साधारणविरोधिकृत् ।
परीधावी प्रमादीचः आनन्दः राक्षसो नलः ॥ ५ ॥

पिङ्गलः कालयुक्तिश्च सिद्धार्थी रौद्रदुर्मती
दुन्दुभिः रुधिरोद्गारी रक्ताक्षी क्रोधनोऽक्षयः ॥ ६ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Sri Vidyabharathi Book Centre, Sringeri

CC-0. In Public Domain. Digitized by eGangotri

यावदस्ति त्रयी लोके
चतुर्मुख-मुखोद्भवा ।
यावद्वा रामचरितं
वाल्मीकिकविचित्रितम् ॥

क्षरन्त्यमृतधारा वा
यावद्व्यासस्य सूक्तयः ।
वाग्देव्या वरपुत्रस्य
कालिदासस्य वा गिरः ॥

तावदेषा देवभाषा
देवी स्थास्यति भूतले ।
यावच्च वंशोऽस्त्यार्याणां
तावदेषा ध्रुवं ध्रुवा ॥

पुरे ग्रामे गृहे कुट्यां
बालो वृद्धो युवापि च ।
करोतु संस्कृताभ्यासं
प्राप्नोतु सुखसम्पदम् ॥

ಶ್ರೀ ಶ್ರೀ ಶೃಂಗೇರಿ ಜಗದ್ಗುರು ಮಹಾಸ್ವಾಮಿಗಳವರ ಕೃಪಾಪೋಷಿತವಾದ
ಧಾರ್ಮಿಕ ಮತ್ತು ಆಧ್ಯಾತ್ಮಿಕ ವಿಚಾರಗಳಿಗೆ ಮೀಸಲಾಗಿರುವ
ಕನ್ನಡ ಮಾಸಪತ್ರಿಕೆ
"ಶ್ರೀ ಶಂಕರ ಕೃಪಾ"
ಇಂದೇ ಚಂದಾದಾರರಾಗಿರಿ.
ವಾರ್ಷಿಕ ಚಂದಾ ರೂ. 24-00

ಪ್ರಭಾ ಮುದ್ರಣಾಲಯ, ಬಸವನಗುಡಿ, ಬೆಂಗಳೂರು-೪
Sri Vidyabharathi Book Centre, Sringeri